व्यालम्ब्येतदि(म्ब्यैवमि)मां मया विरचितां नौकाभिधां व्याकृतिम् ।
सौजन्यामृतसिन्धवः सहृदयाः सर्वे गुणग्राहिणो
निर्व्याजं विहरन्तु भङ्गभरिते साहित्यरत्नाकरे ॥
लोकोत्तारकरामनामघटितोदारप्रबन्धोत्तमं
कुर्वन् कृत्यरतिं स्वकीयकवितामत्युज्ज्वलां लम्भयन् ।
धन्यो धर्मसुधीवरः सुमनसामग्रेसरस्तद्वचो-
व्याख्यानैककृतिः कृती यदि तथा किं नो भवेयं त्वहम् ॥

अथ तत्रभवान् धर्मभट्टाख्यो महाकविः, मोक्षोपयोगिनो रामवासुदेवादयो मताः, रामं मोक्षाय चिन्तयेदित्यादिविधेः श्रीराममीमांसाया मोक्षसाधनतां श्रवणविधेरिव शारीरकमीमांसायाः प्रतीत्या अलंकारशास्त्रप्रणयनापदेशेन श्रीरामचन्द्रगुणवर्णनमेव कर्तुकामः.

*　　*　　*　　*

गणपतिप्रार्थनारूपं मङ्गलमन्तेवास्यनुग्रहार्थं ग्रन्थतो निबध्नाति—आलिङ्ग्येति ।

नन्वत्र—

देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥

वर्णं गणं च काव्यस्य मुखे कुर्यात् सुशोभनम् ।
इति वचनाद्भद्रवर्णभद्रगणानामेव प्रयोक्तव्यता प्रतीयते ।

End:

अत्र गाम्भीर्यं स्पष्टयति—अत्र निजकुलेत्यादिना । सौशब्द्यमुदाहृतप्रायमेवेत्याह—उक्तोदाहरणान्येवेति । निष्कृष्टं स्वमतमावेदयन् तरङ्गमुपसंहरति—एवमित्यादिना श्लोकद्वयेन ॥

Colophon:

इति श्रीमत्रिभुवनविचित्रचरित्रपवित्रचर्लान्ववायसुधासिन्धुसुधामयूखायमानश्रीमद्ब्रह्मान्तर्वाणिपौत्रस्य श्रीसूरमाम्बासहचरश्रीलक्ष्मणाख्यसूरिसूनोः श्रीमद्वेङ्कटसूरिणः कृतौ साहित्यरत्नाकरव्याख्याने नौकाख्याने पञ्चमस्तरङ्गः ॥

श्रीचर्लान्वयलक्ष्मणाख्यविबुधः श्रीसूरमाम्बापतिः
श्रीमद्वेङ्कटनाथसूरिणममुं प्रासूत सूरिं च यः ।
नौकैषा महती च तस्य विवृतिः साहित्यरत्नाकरे
प्रोच्चैः पञ्चतरङ्गरिङ्गणधियामालम्बनं स्याच्चिरम् ॥

सगुणालंकृति काव्यमिति काव्यसामान्यलक्षणे सगुणालंकृतीति विशेषोपात्तानां गुणालंकाराणां मध्ये प्रथमोपात्ततया गुणा निरूपिताः । संप्रत्यवशिष्टानामलंकाराणां निरूपणमन्तेवास्यवधानाय प्रतिजानीते—अथेति ।

* * * *

नामगतमुदाहरति — कृष्णाच्युतेति । अत्र कृष्णादिशब्दानां विष्ण्वादिपर्या ।

R. No. 445.

Paper. $8\frac{1}{4} \times 4\frac{7}{8}$ inches. Foll. 31. Lines, 16 in a page. Telugu. Good.

Purchased in 1911-12 from P. V. Trivikrama Rao of Egmore.

द्वादशस्तोत्रम्— कर्णाटकटीकासहितम्.

DVĀDAŚASTŌTRAM WITH KANARESE MEANING.

This consists of 12 hymns intended to be sung in accompaniment to music and in praise of God Viṣṇu under various significant names. By Ānandatīrtha.

Begins in the third Adhyāya, of which the commencement is wanting, and breaks off in the sixth Adhyāya. The colophon of the third Adhyāya is not given in this MS.

Beginning:

ऽव्यवहारभिदापि गुरोर्जगतां न तु चित्तगता न हि बोध्यपरम् ।
बहवः पुरुषाः पुरुष[:] प्रवरो हरिरित्यवदत्स्वयमेव हरिः ॥

* * * *

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते द्वादशस्तोत्रे चतुर्थोऽध्यायः ॥

End:

राघव राघव राक्षसशत्रो मारुतिवल्लभ जानकीकान्त
देवकीनन्दन सुन्दररूप रुक्मिणीवल्लभ पाण्डवबन्धो ।
देवकीनन्दन नन्दकुमार बृन्दावनाञ्चन गोकुलचन्द्र
कन्दफलाशन सुन्दररूप नन्दितगोकुल वन्दित(पाद) ।

R. No. **446.**

Paper. 9 × 4 inches. Foll. 5. Lines, 8 in a page. Dēvanāgarī. Good.

Purchased in 1911-12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

हलषष्ठीव्रतकथा.

HALASAṢṬHĪVRATAKATHĀ.

Gives an interesting story in relation to a king and queen who obtained children by observing this vow. This Vrata is enjoined

to be observed by women during the dark fortnight in the month of Bhādrapada or Śrāvaṇa with a view to propitiate Caṇḍī (Pārvatī), and is considered to be efficacious in bestowing progeny and prosperity and in preventing the death of children during their parents' lifetime.

Complete. Taken from the Brahmāṇḍapurāṇa.

Beginning:

लसत्प्रसन्नवदनां नीलोत्पलदलेक्षणाम् ।
स्वर्णसिंहासनगतां दिव्यवस्त्रोपशोभिताम् ॥
माणिक्यमणिरत्नाद्यैः कृताभरणभूषिताम् ।
वृद्धां देवीं प्रणम्याथ पप्रच्छुः किन्नरस्त्रियः ॥

स्त्रिय ऊ(चुः)—

कृतानि बहुशो देवि त्वत्प्रसादाद्व्रतानि वै ।
हलषष्ठीव्रतं सम्यक् देवि वक्तुं त्वमर्हसि ॥

वृद्धोवाच—

संप्राप्ते श्रावणे मासि कृष्णे भाद्रपदस्य च ।
हलषष्ठी विधातव्या स्त्रीभिः स्वात्महितेच्छया ॥
पुत्रपौत्रप्रदा सा च सुखसौभाग्यवर्धनी ।
तद्दिने हलकृष्टान्नं वर्जयेद्गोपयोदधि ॥
सुवासिनी सुप्रभाते तामामन्त्र्य व्रतार्थिनी ।
स्नात्वा मध्याह्नसमये धौतवस्त्रा सु(स्व)लंकृता ॥

End:

वृद्धोवाच —

इत्थं याश्च प्रकुर्वीत(रन्) हलषष्ठीव्रतं शुभम् ।
न(स) तासां पुत्रविरहः कदाचिन्नैव जायते ॥
हलषष्ठीकथा दिव्या श्रोतव्या परया मुदा ।

सौभाग्यधनधान्यादिसुखानि च समश्नुते ॥
ब्राह्मणेभ्यस्ततो दानं सधवाभ्यस्तु वायनम् ।
पत्रोपत्री(?) दधन्नार्यो लभन्ते पुत्रपौत्रकान् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे हलषष्ठीव्रतकथा समाप्त(प्ता) ॥

R. No. **447.**

Paper. $8\frac{1}{8} \times 4$ inches. Foll. 123. Lines, 8 in a page. Dēvanāgarī. Good.

Purchased in 1911–12 from P. V. Trivikrama Rao of Egmore.

(*a*) ईशावास्योपनिषत्.

ĪŚĀVĀSYŌPANIṢAD.

Foll. 1*a*—2*a*.

Same work as the one described under No. 300 of the D.C.S. MSS., Vol. I, Part III, but without the Śāntipāṭha.

Complete.

Fol. 2*b* is left blank.

(*b*) ईशावास्योपनिषद्भाष्यम्.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAM.

Foll. 3*a*—6*b*.

Same work as the one described under No. 317 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*c*) केनोपनिषत्.

KĒNŌPANIṢAD.

Foll. 7*a*—9*b*.

Same work as the one described under No. 376 of the D.C.S. MSS., Vol. I, Part III, but without the Śāntipāṭha.

Complete.

(*d*) **केनोपनिषद्भाष्यम्.**

KĒNŌPANIṢADBHĀṢYAM.

Foll. 10*a*—13*a*. Fol. 13*b* is left blank.

Same work as the one described under No. 393 of the D.C.S. MSS., Vol. I, Part III, wherein it is designated as Talavakārō-panisad.

Complete.

(*e*) **कठवल्ल्युपनिषत्.**

KAṬHAVALLYUPANIṢAD.

Foll 14*a*—23*b*.

Same work as the one described under No. 334 of the D.C.S. MSS., Vol. I, Part III, but without the Śāntipāṭha.

Complete.

(*f*) **कठवल्ल्युपनिषद्भाष्यम्.**

KAṬHAVALLYUPANIṢADBHĀṢYAM.

Foll. 24*a*—42*b*. Fol. 42*a* is left blank

Same work as the one described under No. 348 of the D.C.S. MSS., Vol. I, Part III, wherein it is designated as Kāṭhakōpa-nisadbhāṣyam.

Complete.

(*g*) **प्रश्नोपनिषत्.**

PRAŚNŌPANIṢAD.

Foll. 43*a*—50*b*.

Same work as the one described under No. 610 of the D.C.S MSS., Vol. I, Part III, but without the Śāntipāṭha

Complete.

(h) प्रश्नोपनिषद्भाष्यम्.

PRAŚNŌPANIṢADBHĀṢYAM.

Foll. 51a—54a.

Same work as the one described under No. 632 of the D.C.S. MSS., Vol. I, Part III.

Complete.

Fol. 54b is left blank.

(i) अथर्वणोपनिषत्.

ATHARVAṆŌPANIṢAD.

Foll. 55a—61a.

Same work as the one described under No. 713 of the D.C.S. MSS., Vol. I, Part III, but without the Śāntipāṭha.

Also called Muṇḍakōpaniṣad.

Complete.

Fol 61b is left blank.

(j) अथर्वणोपनिषद्भाष्यम्.

ĀTHARVAṆŌPANIṢADBHĀṢYAM.

Foll. 62a—77b. Fol 77a is left blank.

Same work as the one described under No. 724 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(k) माण्डूक्योपनिषत्.

MĀṆḌŪKYŌPANIṢAD.

Foll. 78a—82b. Fol. 7?b is left blank.

Same work as the one described under No. 694 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*l*) माण्डूक्योपनिषद्भाष्यम्.

MĀṆḌŪKYŌPANIṢADBHĀṢYAM.

Foll. 83*a*—91*b*.

Same work as the one described under No. 708 of the D.C.S. MSS., Vol. I, Part III.

Complete.

Fol. 92 is left blank.

(*m*) तैत्तिरीयोपनिषद्भाष्यम्.

TAITTIRĪYŌPANIṢADBHĀṢYAM.

Foll. 93*a*—123*b*. Fol. 123*a* is left blank.

Same work as the one described under No. 517 of the D.C.S. MSS., Vol. I, Part III.

Complete.

R. No. **448.**

Paper. 9⅜ × 4⅝ inches. Foll. 99. Lines, 7 in a page. Dēvanāgarī. Good.

Purchased in 1911–12 from P. V. Trivikrama Rao of Egmore.

Fol. 1 is left blank.

संग्रहरामायणम्.

SAṄGRAHARĀMĀYAṆAM.

A short summary in verse of the story of the Rāmāyaṇa : by Nārāyaṇapaṇḍita, son of Trivikramapaṇḍita.

Bālakāṇḍa and Ayōdhyākāṇḍa, complete.

Beginning:

वन्दे वन्द्यं विधिभवमहेन्द्रादिवृन्दारकेन्द्रै-
र्व्यक्तं व्याप्तं स्वगुणगणतो देशतः कालतश्च ।
धूतावद्यं सुखचिदमलैर्मङ्गलैर्युक्तमङ्गैः
सानाथ्यं नो विदधदधिकं ब्रह्म नारायणाख्यम् ॥

भूषारत्नं भुवनवलयस्याखिलाश्चर्यरत्नं
लीलारत्नं जलधिदुहितुर्देवतामौलिरत्नम् ।
चिन्तारत्नं जगति भजतां सत्सरोजद्यरत्नं
कौसल्याया लसतु मद(म)द्धन्मण्डले पुत्ररत्नम् ॥
मह(हा)व्याकरणाम्भोधिमन्थमानसमन्दरम् ।
कवयन्तं रामकीर्त्या हनूमन्तमुपास्महे ॥
मुख्यप्राणाय भीमाय नमो यस्य भुजान्तरम् ।
नानावीरसुवर्णानां निकषाश्मायितं बभौ ॥
स्वान्तःस्थानन्तशय्याय पूर्णज्ञानरसार्णसे ।
उत्तुङ्गवक्त्ररङ्गाय मध्वदुग्धाब्धये नमः ॥
पृसुक्ति(सूक्ति)रत्नाकरे रम्ये मूलरामायणार्णवे ।
विहरन्तो महीयांसः प्रीयन्तां गुरवो मम ॥
वाल्मीकेर्गौः पुनीयान्नो महीधरपदाश्रया ।
यद्दुग्धमुपजीवन्ति कवयस्तर्णका इव ॥
एको नारायणोऽग्रेऽभूत्पूर्णागण्यगुणार्णवः ।
आत्मारामोऽपि रमया रममाणोऽभिरामया ॥
निद्रामुद्राविलसितं भूत्वा विश्वमधीश्वरम् ।
तमवन्दन्त वेदान्ता नरेन्द्रमिव वन्दिनः ॥
कृतकृत्योऽपि भक्तानां भूतये भगवानयम् ।
सिसृक्षति स्म सकलं सुरासुरनरादिकम् ॥
वासुदेवोऽभवद्देवो मायया प्रियया युतः ।
सर्वमुर्वोरुकमिवामोचयद्योनिबन्धनात् ॥

* * * *

हाराणामिव शुभ्राणां भूपानां भूरितेजसाम् ।
संतत्यां नायकच्छायो राजा दशरथोऽभवत् ॥
अयोध्यां नाम नगरीमध्युवास स पार्थिवः ।
अत्रायतैकच्छत्रो यः सप्तद्वीपवर्ती भुवम् ॥

* * * *

सोऽप्राप्य तन्तुं भार्यासु तिसृष्वप्यन्वचिन्तयत् ।
तत्त्वनिर्णयमप्राप्य त्रय्यां मीमांसको यथा ॥
मन्त्रिणः स सुमन्त्रादीनाहूयेत्थममन्त्रयत् ।
अपुत्रत्वज्वरोऽत्रत्यः सर्वत्रारुचिमान् नृपः ॥
अश्वमेधेन यक्ष्यामि विश्वनाथं सुताप्तये ।
ईश्वरे नः प्रसन्ने किं दुर्लभं भक्तवत्सले ॥

End:

न जघान दयालुस्तं तस्य नेत्रमशान्तयत् ।
तदाप्रभृति सर्वेऽपि काका एकाक्षतां ययुः ॥
खलावलेपखण्डनः स्थिरावतारविभ्रमः ।
अवेक्षते स्म जानकीमुखेन्दुमिन्दिरापतिः ॥
सीतामुखाब्जस्मितभानुभानुः सत्कैरवानन्ददचन्द्रभानुः ।
रक्षस्तृणौघक्षपणस्फुलिङ्गो रराज रामस्य कटाक्षमोक्षः ॥

Colophon:

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायण-पण्डिताचार्यविरचिते श्रीमत्संग्रहरामायणे अयोध्याकाण्डे द्वादशः सर्गः ॥

अयोध्याकाण्डः समाप्तः ॥

पुरा पुलस्त्यः परमेष्ठिपुत्रः तन्वंस्तपो मेरुगिरेः समीपे ।
विलोभयन्तीर्मुहुरेत्य कन्या विलोक्य किंचित्कुपितो बभाषे ॥

व्यासराजेन्दुमाशासे चन्द्रिका यस्य संतता ।
दुर्वादिचोरान् विद्राव्य रक्षितं(रक्ष) भुवनत्रयम् ॥
अनधीत्य महाभाष्यं व्याख्यातं यदनुग्रहात् ।
वन्दे तं विधिना सत्यनिधिं विज्ञानसिद्धये ॥
ज्ञानभक्त्या(क्त्या)द्युपेतानामाचार्याणामनुस्मृतेः ।
अञ्जस्तरामि दुर्गाणि येभ्यो लब्धा मया सुधा ॥
रामचन्द्रप्रसादाभिलब्धाभिनवचान्द्रिका ।
तत्त्वप्रकाशिकाव्याख्या व्यज्यते विदुषां मुदे ॥
अनुवादः पूर्वपक्षिसिद्धान्तानां करिष्यते ।
अयोगं बहुवाक्यानामुक्त्वा योगः प्रदर्श्यते ॥

स्वयं मङ्गलमनुष्ठाय शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति—शुद्धेति । ब्रह्म वन्दे इत्यन्वयः । सैवशब्दावाच्यं ब्रह्मेति मतनिरासाय मुकुन्दाभिधमिति ।

End:

कथं तर्हि न हि कश्चित् प्रकाशमानेऽर्थे संदिग्ध इति टीकायां संदेह. मात्राभावव्युत्पादनमिति चेत्, मैवम्, तत्रापि आकारविशेषणैव संदेहाभावस्य व्युत्पादितत्वात् ; न हि प्रकाशमानः कोऽपि घटादिः सर्वथा संदेहाविषयोऽस्ति । तत्रा.

R. No. **450**.

Paper. 10¾ × 4½ inches. Foll. 143. Lines, 10—15 in a page. Dēvanāgarī and Telugu. Good.

Purchased in 1911-12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

कालमाधवीयम्.

KĀLAMĀDHAVĪYAM.

Same work as the one described under No. 3109 of the D.C.S. MSS., Vol. VI.

Breaks off in Grahaṇādhikāra.

R. No. **451.**

Paper. 10 × 5 inches. Foll. 54. Lines, 11 in a page. Dēvanāgarī. Good.

Purchased in 1911-12 from P. V. Trivikrama Rao of Egmore.

भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM

Same work as the one described under No. 2080 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

R. No. **452.**

Paper. 8 × 4 inches. Foll. 165. Lines, 7 in a page. Dēvanāgarī Good.

Purchased in 1911-12 from P. V. Trivikrama Rao of Egmore.

ब्रह्मसूत्रानुव्याख्यानम्.

BRAHMASŪTRĀNUVYĀKHYĀNAM.

Foll. 1*a* –164*a*.

The remaining foll. are left blank.

Same work as the one described under No. 4819 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **453.**

Paper. 12½ × 4 inches. Foll. 76. Lines, 9 in a page. Dēvanāgarī. Good.

The following works obtained from different persons are bound together in this one volume.

Fol. 1*a* is left blank.

(*a*) प्रश्नोपनिषद्भाष्यविवरणम्.

PRAŚNŌPANIṢADBHĀṢYAVIVARAṆAM.

Foll. 1*b* –22*b*.

Purchased in 1911-12 from C. J. Rāmacandra Rao of Madras.

A commentary on the Praśnōpaniṣadbhāṣya of Ānandatīrtha; by Jayatīrthabhikṣu.

Complete.

Beginning:

पान्तु नः पद्मनाभस्य श्रीपदाम्बुजरेणवः ।
कमलाकबरीभार(सौर)भीकरणोद्यताः ॥

इह खलु संसारपारावारे विनिपतितमधिकारिजनं जननी तनयमिव परमात्मतत्त्वज्ञानलवेनोद्दिधीर्षुरियमाथर्वणी ब्राह्मणोपनिषदितिकर्तव्यतामन्तरेण न तत्त्वज्ञानकारणतामापद्यते। अतस्तादितिकर्तव्यतारूपं न्यायगर्भं भाष्यं करिष्यन्नावा(चा)र्यः प्रारिप्सितपरिसमाप्त्यादिप्रयोजनमेतदुपनिषत्प्रतिपाद्य · देवताप्रणतिमादौ निबध्नाति--नम इति । नानिर्धारितस्वरूपस्य प्रणामो युक्तः, न न्वा(त्व)न्तरेण लक्षणं वस्तुनिर्धारणमित्यतो वासुदेवस्य लक्षणमाह—प्राणादीति ।

End:

एवमाख्यायिकां समाप्य वेदपुरुषः शिष्यशिक्षार्थमाह—नमः परम. ऋषिभ्यः पिप्पलादादिभ्य इति। द्विर्वचनमादरार्थं इति। अत एव भाष्यकारोऽप्यन्ते च भगवत्प्रणामं निबध्नाति—नमइति ॥

वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा रचिता ।
भ्रियतां हृदये सदये कमलामहिलेन पुरुषेण ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य षट्प्रश्नोपनिषद्भाष्यस्य विवरणं जयतीर्थभिक्षुविरचितं समाप्तम् ॥

(*b*) तैत्तिरीयोपनिषद्भाष्यम्.

TAITTIRĪYŌPANIṢADBHĀṢYAM.

Foll. 23*a*—36*b*.

Presented in 1911-12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

Same work as the one described under No. 517 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(c) सदाचारस्मृतिव्याख्या—आह्निककौस्तुभः.
SADĀCĀRASMṚTIVYĀKHYĀ : ĀHNIKA-
KAUSTUBHAḤ.

Foll. 37a—75b. Fol. 76 is left blank.

Purchased in 1911-12 from C. J. Rāmacandra Rao of Madras.

A commentary on the Sadācārasmṛti of Ānandatīrtha: by Śrīnivāsa, a disciple of Yādavācārya. The commentary is called Āhnikakaustubha.

Complete

Beginning:

व्यासं मारमणं नत्वा गुरून् परगुरूनपि ।
व्याख्यां करिष्ये प्रमितां सदाचारस्मृतेरहम् ॥
सदाचारस्मृतिव्याख्यारूपेणाह्निककौस्तुभी(भः) ।
विरच्यते स्वधीशुद्ध्यै श्रीनिवासाख्यसूरिणा ॥

अथ कलियुगावतीर्णदानवप्रसञ्जितदुर्मतध्वान्तनिरासाय अतिविशदः ज्ञानालोकप्रवर्तनाय च साक्षान्मुख्यवायुरेव भुवि गृहीतमनुष्यविग्रह-श्रीमदानन्दतीर्थाचार्यवर्यः सर्वसत्कर्मसु भगवदर्पणसहकृततताविधेयः सदाचारस्मृत्याख्यं ग्रन्थं चकार ।

* * * *

मङ्गलं शिष्यान् ग्राहयितुं विषयादि सूचयन् ग्रन्थादौ निबध्नाति—यस्मिन्निति ।

End:

निखिलमङ्गलगुणानां नित्यानुभव एव सती तनुर्यस्य स तथा । तत एवाशेषैः पारतन्त्र्यादिदोषैः रहितः पुरुषेभ्यो विरिञ्चादिभ्य उत्तमः हरिः प्रीयतां प्रसन्नो भवत्विति ॥

* * * *

वेदव्यासस्य सत्कण्ठे गुर्वाराध्यपदः सदा ।
भासतां रत्नमालाभस्त्वयमाह्निककौस्तुभः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य सदाचारस्मृति-ग्रन्थस्य विवरणे श्रीमद्यादवाचार्यपूज्यपादशिष्येण श्रीनिवासेन विरचिते आह्निककौस्तुभे ब्रह्मकर्मजातं संपूर्णम् ॥

R. No. **454.**

Paper. 13¼ × 3⅞ inches. Foll. 69. Lines, 9 in a page. Dēvanāgarī. Good.

Purchased in 1911-12 from C. J. Rāmacandra Rao of Madras.

Fol. 1*a* gives the name of the former owner and scribe of the MS. thus:

जयकृष्णाचार्यस्येदं पुस्तकं स्वहस्तलिखितम् ।

Foll. 1*b* and 2 are left blank.

(*a*) भेदोज्जीवनटिप्पणी.

BHĒDŌJJĪVANAṬIPPAṆĪ.

Foll. 3*a*—49*b*.

A short commentary by Kāśi Timmaṇācārya on the Bhēdōjjīvana, which is a treatise by Vyāsayati, a disciple of Brahmaṇyapūjyapāda, in support of the Dvaita view of the Vēdānta, viz., that Brahman, soul, and matter are fundamentally different entities.

Complete.

Beginning:

जन्माद्यस्य यतः शास्त्रगम्यमन्वयतः पृथक् ।
परमं ब्रह्म विष्ण्वाख्यमधिकं तमुपास्महे ॥

अखिलापेक्षितमोक्षप्रयोजकपरदेवतोत्कर्षप्रतिपत्तिप्रतिबन्धकाभेदप्रतिपत्तिनिषेधपूर्वकविभेदव्यवस्थापनाय प्रकरणमारभमाणः श्रीमद्व्यासतीर्थमुनि-

रनन्तरायपरिसमाप्तये प्रचयाय च परमेश्वरं प्रार्थयते—स्वभावत इति। यद्यपि भगवत्पादैरेव सपरिकरं भेदो व्यवस्थापितः, तथापि तदेवात्र संगृह्य संक्षेपेणोपपाद्यत इत्यवैयर्थ्यम्। विष्णुर्जयतात् विश्वोत्कर्षेण विज्ञातो वर्तताम्। नातो नित्यसिद्धविष्णूत्कर्षप्रार्थनानुपपत्तिः। नन्वस्य विश्वोत्कर्ष एव कथमत आह—जगदीश्वर इति।

End:

तस्माज्जडजीवेश्वराणां परस्परभेदप्रपञ्चस्य पारमार्थिकत्वात् परमेश्वर-परमप्रसादसिद्ध्ये सकलजगज्जन्मादिकारणत्वाद्यनन्तकल्याणगुणगणाकरतया सर्वोत्तमत्वेनं सर्वदैव समुपास्यः श्रीनारायण एवेति सिद्धम्॥

दुरन्तदुर्मतध्वान्तध्वंसकृन्मध्वभास्करः।
बलित्थेत्यादिनोक्तगुणः प्रीतोऽस्तु मे सदा॥

Colophon:

भेदोज्जीवनटिप्पणी काशी तिम्मण्णाचार्यकृता समाप्ता॥

(b) मायावादखण्डनपञ्चिका — सव्याख्या

MĀYĀVĀDAKHAṆḌANAPAÑCIKĀ WITH COMMENTARY.

Foll. 52a—69a. Fol. 50a contains the following which seems to indicate the name of the commentary and of its author:—

मायावादखण्डनं (?) व्यासयतिकृतमन्दारमञ्जरीसहितम्॥

Foll. 50b, 51 and 69b are left blank.

This contains the commentary of Jayatīrtha on Ānandatīrtha's Māyāvādakkaṇḍana together with a commentary. The former commentary is the same as the one described under No. 4836 of the D.C.S. MSS., Vol. X. The latter seems to be by Vyāsatīrtha and is called Mandāramañjarī.

Incomplete.

Beginning of the commentary:

कमलारमणं नत्वा पूर्णबोधेष्टदैवतम्।
व्याकुर्वे गहनां मायावादखण्डनपञ्चिकाम्॥

स्पष्टार्थो य इह ग्रन्थः स न व्याक्रियते मया ।
ग्रन्थगौरवभीरुत्वान्न चोद्ग्रन्थं बहूच्यते ॥

मङ्गलाचरणपूर्वकं चिकीर्षितं निर्दिशति—नरसिंहमिति । नरसिं.. स्यैव नम्यत्वे को हेतुः? असह्योरुप्रत्यूहतिमिरापहमिति ।

End:

निरस्त इत्युक्तमिति । अज्ञानासंभवादेव तन्मतमखिलमपाकृत-मित्यर्थः । तदभावादेवेति । विषयप्रयोजनयोः प्रत्येकमधिकारिणं प्रति व्यापकत्वाद्विषयप्रयोजनाभावयोः प्रत्येकमधिकार्यभावे हेतुत्वं द्रष्टव्यम् । सं

R. No. **455.**

Paper. 8×4 inches. Foll. 84. Lines, 9 in a page. Telugu. Good.

Purchased in 1911-12 from P. V. Trivikrama Rao of Egmore.

भगवद्गीतातात्पर्यनिर्णयः.

BHAGAVADGĪTĀTĀTPARYANIRṆAYAḤ.

Foll. 1b—84a. Foll. 1a and 84b are left blank.

A treatise intended to determine the essential teachings of the Bhagavadgītā: b Ānandatīrtha.

Complete in eighteen Adhyāyas.

Beginning:

समस्तगुणसंपूर्णं सर्वदोषविवर्जितम् ।
नारायणं नमस्कृत्य गीतातात्पर्यमुच्यते ।

शास्त्रेषु भारतं सारस्तत्र नामसहस्रकम् ।
वैष्णवं कृष्णगीता च तज्ज्ञानान्मुच्यतेऽञ्जसा ॥

न भारतसमं शास्त्रं कुत एवानयोः समम् ।
भारतं सर्ववेदाश्च तुलामारोपिताः पुरा ॥

देवैर्ब्रह्मादिभिः सर्वैः ऋषिभिश्च समन्वितैः ।
व्यासस्यैवाज्ञया तत्र त्वत्यरिच्यत भारतम् ॥

*   *   *   *

तत्र साक्षादिन्द्रावतारमुत्तमाधिकारिणमात्मनः प्रियतममर्जुनं क्षत्रियाणां विशेषतोऽपि परमधर्मं नारायणद्विट्तदनुबन्धिनिग्रहं बन्धुस्नेहादधर्मत्वेनाशङ्क्य ततो निवृत्तप्रायं स्वविहितवृत्त्या भक्त्या भगवदाराधनमेव परमो धर्मः तद्विरुद्धः सर्वोऽप्यधर्मः भगवदधीनत्वात् सर्वस्येति बोधयति भगवान्नारायणः । सर्वं चैतदत्रैवावगम्यते—

'अथ चेत् त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥' इत्यादिना

युद्धस्य स्वधर्मत्वम् ।

End:

नमस्ते वासुदेवाय प्रेयसां मे प्रियोत्तम ।
समस्तगुणसंपूर्ण निर्दोषानन्ददायिने ॥

*   *   *   *

निःशेषदोषरहितकल्याणगुणसद्गुण ।
भूतिस्वयंभुशर्वादिवन्द्यं त्वां नौमि मे प्रियम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीतातात्पर्यनिर्णये अष्टादशोऽध्यायः ॥

The scribe gives his name in the following stanza :—

चेञ्जिवेन्वयसंजातराजारायार्यसूनुना ।
नारायणेन लिखितं प्रीत्यै माधवमध्वयोः ॥

R. No. 456.

Paper. 8 × 4 inches. Foll. 113. Lines, 6 in a page. Dēvanāgarī. Good.

Purchased in 1911–12 from P.V. Trivikrama Rao of Egmore.

ऋग्भाष्यम्.

RGBHĀṢYAM.

Foll. 1a—111b. Fol. 1b is left blank.

Same work as the one described under No. 31 of the D.C.S MSS., Vol. I, Part I.

Complete.

Fol. 112 contains a few lines of Jayatīrtha's gloss on the Ṛgbhāsya. Fol. 113 is left blank.

R. No. **457.**

Palm-leaf. 14¼ × 1 inches. Foll. 211. Lines, 5 in a page. Telugu. Slightly injured.

Purchased in 1911-12 from M. Rāmakrṣṇakavi of Vanaparti.

(a) वार्षिकतन्त्रम्—आन्ध्रव्याख्यासहितम्.

VĀRṢIKATANTRAM WITH TELUGU COMMENTARY.

Foll. 1a—83b. Fol. 37b is left blank.

A work on astronomy: by Viddhaṇācārya, son of Mallappa of Kauṇḍinyagōtra. The titles of the Adhyāyas are given below:—

I. ध्रुवमध्याध्यायः.
II. ग्रहगतिनिर्णयाध्यायः.
III. छायाध्यायः.
IV. चन्द्रग्रहणाध्यायः.
V. सूर्यग्रहणाध्यायः.
VI. वलिलेखनाध्यायः.
VII. महापाताध्यायः.
VIII. उदयास्तमयाध्यायः.
IX. ग्रहयुत्यध्यायः.
X. भग्रहयुत्यध्यायः.
XI. शृङ्गोन्नत्यध्यायः.

Complete.

Beginning:

आब्रह्मकल्पादिचरान् भचक्रान् नक्षत्रचन्द्रग्रहतारकादीन् ।
विभावयत्यात्ममहाप्रभावात्सोऽह्नां पतिः पातु सदा जगन्ति ॥

अस्ति स्म कौण्डिन्यमुनिर्मुनीनामग्रेसरो विप्रकुलप्रदीपः ।
त्रयीं विधातुं प्रथमं विधाता यमेकपात्रं प्रथितं चकार ॥

तस्याभिजातः पृथुकीर्तिरग्र्यः प्रभूतविद्यः प्रचुरव्रताद्यः ।
ज्योतिर्विदां भानुरिवाग्रगण्यो विभुः समानो भुवि मल्लपोऽभूत् ॥

तस्याभवद्विद्धणनामधेयः सूनुः सुधा(रोचिरिव) द्वितीयः ।
सुवृत्तवानुद्धृतपैत्रलोकस्तन्निर्मितं वार्षिकतन्त्रमेतत् ॥

शाको॰नवाद्रान्दुगुणैः(३१७९)समेतः·
(शैलाम्बर)व्योमनिशाकर(१००७)घ्नः ।
खखाष्ट(८००)भक्तो भृगुवारपूर्वः
कल्यादितः सावनका ध्रुवः स्यात् ॥

* * * *

इन्दुध्रुवांशा रविभिर्विभक्ताः संक्रान्तिसंज्ञास्तिथयो भवन्ति ।
ताभिर्विशुद्धांशगतर्तुहीनः चैत्राधिकाद्यास्तिथयो द्युराशिः ॥

End:

विलेख्य तन्मध्यदिनेशबिन्दोः मध्ये निदध्याच्छ्रुतितुल्यरेखाम् ।
सा यत्र संस्पृक्शशिबिम्बरेखां ततो निधेयान्निशिताङ्गुलानि ॥

* * * *

कौण्डिन्यवंशे किल विद्धणार्यो ग्रहालयं वार्षिकनामधेयम् ।
कृत्वा तदग्रे कृतवान् सुवृत्तं चान्द्रं च शृङ्गोन्नतिना कलापम् ॥

* * * *

Colophon:

इति विद्धणाचार्यकृतौ वार्षिकतन्त्रे आन्ध्रभाषाव्याख्याने शृङ्गोन्नत्य·
विकारो नामैकादशोऽध्यायः ॥

(*b*) ग्रहतन्त्रविवरणम्.

GRAHATANTRAVIVARAṆAM.

Foll. 84*a*—97*a*.

Similar to the above.

A commentary on the Grahatantra of Ahōbilanātha: by Vēṅkaṭayajvan, son of Tirumalayajvan of Vēllāla Yallayārya family. The titles of the eight Adhyāyas contained in the work are—

I. मध्यग्रहाधिकारः.	V. सोमग्रहणाधिकारः.
II. स्फुटाधिकारः.	VI. सूर्यग्रहणाधिकारः.
III. पाताधिकारः.	VII. वलिलेखनाधिकारः.
IV. उपकरणाधिकारः.	VIII. शृङ्गोन्नत्यधिकारः.

From the stanza (quoted below), given for finding out the Śaka era for any year, it appears that this work was composed between Śaka 1489 and 1549.

Complete.

Beginning:

नरसिंहगुरुं वन्दे गुरुं सद्भक्तचित्प्रदम् ।
द्विजोत्तमकृतौ नित्यं दैवज्ञवरभूषणम् ॥
वेल्लालतिम्मयज्वेन्द्रसूनुवेङ्कटयज्वना ।
मयाहोबिलनाथीयं ग्रहतन्त्रं प्रकाश्यते ॥
खरसा (६०) गुणनेत्र (२३) घ्ना गतवत्सरसंयुताः ।
नन्दाभ्रभूमिभि(१०९)र्युक्ता भवेयुः शकवत्सराः ॥

End:

अन्तर्मुखं नयेदिन्दुबिम्बपश्चिमबिन्दुतः ।
श्रुत्याङ्गुलाधिकं शुक्लं तदग्रोत्तरयाम्ययोः ॥

* * * *

गुरुप्रसादतः स्पष्टं प्रोक्तं वेङ्कटयज्वना ।
भुव्यहोबिलनाथीयं जयत्वाचन्द्रतारकम् ॥

Colophon :

इति श्रीमद्वेल्लालयल्लयार्यान्वयजातिरुमलयज्वसूनुसिद्धान्तिसार्वभौम-वेङ्कटयज्वविरचिते अहोबिलनाथीयग्रहतन्त्रे शृङ्गोन्नत्यधिकारोऽष्टमः ॥

Fol. 97*b* is left blank.

(*c*) गणकानन्दः—आन्ध्रटीकासहितः.

GAṆAKĀNANDAḤ WITH TELUGU MEANING.

Foll. 98*a*—136*b*.

The leaves are in great disorder, and it is not possible to rearrange them so as to present the subject-matter in continuity. Similar to the work described above.

Incomplete.

Beginning :

स्वोच्चं ग्रहोनित(तं)केन्द्रमनिमन्दोच्चाद्वियुच्छायं चरमं च । ७, १२, १६, २९.

* * * *

सूर्यबाहुबलाभ्यस्ता खेचराणां गतिः पृथक् ।
चन्द्रलिप्ताहृतं लब्धं लिप्ताद्यं भानुवद्ग्रहैः ॥

End :

अस्तं भजन्ते च समुद्गमांशैरेतैर्भचक्रप्रातिकाप्रतीच्याम् ।
उद्गतसौम्याशिताप्रतीच्याम् . . . . . . ॥

Colophon :

इति गणकानन्दे मध्यग्रहः समाप्तः ॥

(*d*) पञ्चाङ्गशिरोमणिः—आन्ध्रटीकासहितः.

PAÑCĀṄGAŚIRŌMAṆIḤ WITH TELUGU MEANING.

Foll. 137*a*—207*a*. Fol. 207*b* is left blank.

A treatise on the calculations to be made in preparing a Hindu calendar : by Tripurāri, who seems to have lived after Śaka 1549.

Breaks off in the third Adhikāra.

Beginning :

यश्चक्षुः सर्वलोकानां सृष्टिस्थितिलयप्रभुः ।
तं नत्वा भास्करं वक्ष्ये पञ्चाङ्गानां शिरोमणिम् ॥
षष्टिर्नवदश(गुणि)तं व्यपगतसंवत्सरेण संमिश्रम् ।
नवगगनाब्धिसमेतं शकनृपकालं विजानीयात् ॥

*   *   *   *

Colophon :

इति त्रिपुरारिविरचिते पञ्चाङ्गशिरोमणौ मध्यतिथ्यधिकारः प्रथमः ॥

End :

इति त्रिपुरारिविरचिते पञ्चाङ्गशिरोमणौ स्फुटाधिकारो द्वितीयः ॥
एकायने गतौ स्यातां सूर्याचन्द्रमसौ यदा ।
तद्युता मण्डलक्रान्ति . . . . वैधृताभिधा ॥

*   *   *   *

అస్తుంగాను ౬౦ ఘటియలురి స్తేను నైవత్యాజ్యంఅవున్న యరుచునాడురాను కానేది.

(*e*) वररुचिवाक्यम्.

VARARUCIVĀKYAM.

Foll. 208*a*—211*b*.

Similar to the above.

Incomplete.

Beginning :

गीर्नः श्रेयः। धेनवः स्त्री । रुद्रस्तु नम्यः । भव्यो हि ज्या । धन्येयं नारी । धान्यवान् पुत्रः ।

End :

मानदो निधिः । रङ्गेशाद्दद्दा ।

R. No. **458.**

Paper $11\frac{5}{8} \times 5\frac{1}{4}$ inches. Foll. 32. Lines, 14 in a page. Dēvanāgarī. Good.

Purchased in 1911-12 from C. J. Rāmacandra Rao of Madras.

Fol. 1 is left blank.

न्यायसुधाव्याख्या—वाक्यार्थचन्द्रिका.
NYĀYASUDHĀVYĀKHYĀ: VĀKYĀRTHACANDRIKĀ.

Foll. 2a—32a. Fol. 32b is left blank.

A commentary on Jayatīrtha's Nyāyasudhā which is itself a commentary on the Brahmasūtrānuvyākhyāna of Ānandatīrtha. The author speaks of Jayamuni, Raghuvaryatīrtha, Rāmagirīndra and Vyāsamuni.

Incomplete.

Beginning:

नित्यागण्यबलद्युतिप्रमतिसत्सौख्याग्रवीर्यातुलौ-
दार्यप्राभवधीरतामुखगुणव्रातादिदिव्याकृतिम् ।
संतापादिसमस्तदोषविधुरं वेदैकवेद्यं जग-
ज्जन्मादिप्रदमिन्दिरेशमनिशं नारायणं नौम्यहम् ॥

* * * *

सत्सूत्रान्वितमध्वभाष्यविलसद्गाण्डीवसंयोजितैः
सन्मानेषुभिरर्दयन् कुसमयिप्रत्यर्थिदुःस्यन्दनान् ।
श्रीकृष्णेरितवेदवाजिनयनश्रीमध्वशास्त्रोल्लस-
द्दिव्यस्यन्दनसंस्थितो जयमुनीशाख्यार्जुनः स्यान्मुदे ॥
सच्छास्त्रामलभावबोधकिरणैः संवर्धयन्मध्वस-
त्सिद्धान्ताब्धिमनन्तशिष्यकुमुदव्रातं विकासं नयन् ।
उद्भूतो रघुवर्यतीर्थजलधेस्तापत्रयं त्रासयन्
यस्तं नौमि रघूत्तमाख्यशशिनं श्रीविष्णुपादाश्रितम् ॥
श्रीमद्रामगिरीन्द्रपादनिरतं विद्रावयन्तं दिशो
दुर्वादीन्द्रमहामृगान्निगमसद्व्याख्यालसन्नादतः ।
दुःशास्त्रेभकुतर्ककुम्भदलनप्रौढात्मविद्यानखं
वेदव्यासमृगेन्द्रराजमधिकं वन्देऽनिशं मद्गुरुम् ॥
वेदान्ताब्धिममन्दबोधगिरिणा सद्ब्रह्मसूत्राहिना
दुस्तर्केतरदानवामरगणैः संमथ्य यो लब्धवान् ।

सन्न्यायामृतचन्द्रिके युधि तथा तर्केऽकरोत्ताण्डवं
सोऽयं व्यासमुनीन्द्रपूज्यचरणो नित्यं भवेन्मे मुदे ॥

अनुव्याख्याब्धियुङ्न्यायसुधागाधसुधापगाम् ।
गुरूणां दयया शुद्ध्यै धियः सेवितुमुत्सहे ॥

टीकाकाराः ग्रन्थादौ मङ्गलमाचरन्ति—श्रियः पत्ये इति । नारायणमिति प्रथमपद्यव्याख्यानरूपेऽत्र पद्ये नारायणपदस्थाने हरिपदप्रक्षेपेण प्रादुर्भूत इति श्लोकोक्तहरेरेव नारायणत्वादुत्तरश्लोकोक्तं तमेवेति समर्थितं भवति ।

End:

काणोऽहं मूकोऽहमिति धर्मविशिष्टेन्द्रियाणामहंत्वेन सामानाधिकरण्यस्य सत्त्वात् शरीरस्याहंप्रत्ययालम्बनत्वज्ञानान्वयव्यतिरेकयोरिन्द्रियात्मनामाश्रयत्वेनाप्युपपत्तेरिन्द्रियाणामेव व्यस्तानामात्मत्वमित्यपरे । एतेनेन्द्रियचैतन्यपक्षोऽपि निरस्त इति गीताभाष्यटीकायामियमेव तत्पक्षप्रसक्तिरभिमता । तत्संनिधावीक्षणदर्शनस्य शरीरादिसर्वसाधारणत्वेनास्यव विशेष्यप्रसञ्जकत्वात्तत्रैव पूर्वत्र शरीरप्राणजाठरानलेन्द्रिय.

R. No. **459.**

Paper. $9\frac{3}{4} \times 3\frac{7}{8}$ inches. Foll. 23. Lines, 8 in a page. Dēvanāgarī. Good.

Purchased in 1911–12 from P. V. Trivikrama Rao of Egmore.

वेङ्कटेशमाहात्म्यम्.

VĒṄKAṬĒŚAMÂHĀTMYAM

A legendary account of the sanctity and importance of the shrine of Śrīnivāsa, a form of Viṣṇu worshipped on the Tirupati hills. Its due repetition is held to be efficacious in the accomplishment of one's desires.

Complete in five Adhyāyas, as found in the Ādityapurāṇa.

Beginning:

श्रीवेङ्कटेशमाहात्म्यं श्रीनिवासप्रसादतः ।
श्रीप्रदं सर्वतः सूत दयया प्रोक्तवानसि ॥
इतः परं श्रीनिवासः श्रीपतिः सर्वशो हि नः ।
कथं प्रीतो भवेत्सद्यो ह्यभीष्टानि प्रवर्षयेत् ॥
तद्वदस्व कृपापूर्ण वेङ्कटेशकथामृतम् ।
भगवन् सर्वतत्त्वज्ञ दयापात्रं वयं तव ॥

श्रीसूतः—

शृणुध्वं मुनयो दिव्यं सावधानतया त्विदम् ।
यथा पृष्टं तथैवाहं वक्ष्याम्येव न चान्यथा ॥

* * * *

अत्र वः कथयामीष्टमितिहासं मनोरमम् ।
यस्य स्मरणमात्रेण भक्तिर्विष्णुपदाम्बुजे ॥
वायुशिष्यो देवशर्मा विष्णुभक्तो जितेन्द्रियः ।
तपस्वी बहुनिष्ठावान् सर्वदा विष्णुचिन्तने ॥

End:

स्तोत्रेणैव हि संतुष्टो वेङ्कटेशो रमापतिः ।
यान्यान् कामान् कामयते तांस्तान्मुक्तिं ददाति च ॥

Colophon:

इति श्रीमदादित्यपुराणे श्रीवेङ्कटेशमाहात्म्ये लक्ष्मीवेङ्कटेश्वरस्तोत्रकरणं नाम पञ्चमोऽध्यायः ॥

R. No. **460.**

Paper. $15\frac{3}{8} \times 4\frac{1}{8}$ inches. Foll. 476. Lines, 8 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of **Manalur,** **Tanjore** district.

Foll. 53*b*—64*b* are left blank.

तत्त्वचिन्तामणिदीधितिप्रकाशिका—गादाधरी.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ : GĀDĀDHARĪ.

Same work as the one described under Nos. 4041 and 4042 of the D.C.S. MSS., Vol. VIII.

Anumāna, complete.

R. No. **461.**

Paper. 15⅜ × 4⅜ inches. Foll. 26. Lines, 10 in apage. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिदीधितिप्रकाशिका—गादाधरी.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ : GĀDĀDHARĪ.

Same work as the one described under No. 4031 of the D.C.S. MSS., Vol. VIII.

Anumāna, incomplete.

R. No. **462.**

Paper. 15½ × 4⅛ inches. Foll. 45. Lines, 7 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिदीधितिप्रकाशिका—गादाधरी.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ : GĀDĀDHARĪ.

Same work as the one described under No. 4041 of the D.C.S. MSS., Vol. VIII.

Contains the Vyāptigrahōpāya and the Avacchēdakatānirukti.

R. No. **463.**

Paper. 15¼ × 4⅜ inches. Foll. 55. Lines, 8 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिदीधितिप्रकाशिका—गादाधरी.

TATTVACINTĀMAṆIDHĪDITIPRAKĀŚIKĀ : GĀDĀDHARĪ.

Same work as the one described under No. 4041 of the D.C.S. MSS., Vol. VIII.

Contains the Sāmānyalakṣaṇābhāva only.

R. No. **464.**

Paper. 15½ × 4⅝ inches. Foll. 99. Lines, 8 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिदीधितिव्याख्या—गादाधरी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : GĀDĀDHARĪ.

Similar to the work described under No. 4041 of the D.C.S. MSS., Vol. VIII.

Contains the Śabdakhaṇḍa only. Wants beginning and end.

R. No. **465.**

Paper. 18 × 3⅝ inches. Foll. 176. Lines, 9 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : JĀGADĪŚĪ.

Same work as the one described under No 4086 of the D.C.S. MSS., Vol. VIII

Anumāna, complete.

R. No. **466.**

Paper. $15\frac{3}{4} \times 3\frac{1}{8}$ inches. Foll. 278. Lines, 8 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिव्याख्या—फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ : PHAKKIKĀ.

Same work as the one described under Nos. 4019 and 4020 of the D.C.S. MSS., Vol. VIII.

Anumāna, complete.

R. No. **467.**

Paper. $17\frac{1}{2} \times 3\frac{7}{8}$ inches. Foll. 123. Lines, 8 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिव्याख्या—फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ : PHAKKIKĀ.

Same work as the one described under Nos. 4019 and 4020 of the D.C.S. MSS., Vol. VIII.

Wants beginning and end in the Anumānakhaṇḍa.

R. No. **468.**

Paper. $13\frac{1}{2} \times 3\frac{1}{2}$ inches. Foll. 269. Lines, 8 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिव्याख्या—फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ : PHAKKIKĀ.

Same work as the one described under Nos. 4027 and 4028 of the D.C.S. MSS., Vol. VIII.

Contains the Śabdakhaṇḍa complete.

R. No. **469.**

Paper. 19 × 4¾ inches. Foll. 70. Lines, 10 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिव्याख्या—मयूखः.

TATTVACINTĀMAṆIVYĀKHYĀ : MAYŪKHAḤ.

Same work as the one described under No. 4029 of the D.C.S. MSS., Vol. VIII.

Contains the Anumāna complete.

R. No. **470.**

Paper. 13¼ × 3⅜ inches. Foll. 27. Lines, 8 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिदीधितिप्रकाशिका—गादाधरी.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ : GĀDĀDHARĪ.

Same work as the one described under No. 4043 of the D.C.S. MSS., Vol. VIII.

Nañvāda, complete.

R. No. **471.**

Paper. 13½ × 3⅝ inches. Foll. 23. Lines, 8 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

न्यायकुसुमाञ्जलिकारिका—सव्याख्या.

NYĀYAKUSUMĀÑJALIKĀRIKĀ WITH COMMENTARY.

This commentary on the Nyāyakusumāñjalikārikā of Udayanācārya is by Haridāsabhaṭṭācārya.

Complete.

Beginning:

ईषदीषदनधीतविद्यया तातमात्तमुदमाविवर्धयन् ।
क्षेपणाय भवजन्मकर्मणां कोऽपि गोपतनयो नमस्यते ॥

इष्टदेवतासङ्कीर्तनं ब्रह्मप्रतिपादकसच्छब्दप्रयोगात्मकं च मङ्गलं कुर्वन् ग्रन्थनामाह—

सत्पक्षप्रसररसतां परिमलप्रोद्बोधबद्धोत्सवो
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रम-
च्चेतो मे रमयत्वविघ्नमनघन्यायप्रसूनाञ्जलिः ॥

एषोऽनघो निर्दोषो न्यायः समस्तरूपोपपन्नालिङ्गप्रतिपादकवाक्यं स एव कुसुमाञ्जलिः मे मम चित्तं रमयतु ।

* * * *

स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥

स्वर्गापवर्गयोः स्वर्गगत्यपवर्गयोः जीवन्मुक्तिपरममुक्त्योः । ईश्वरमननञ्च तेषु द्वारमात्मसाक्षात्कारश्च ।

End:

इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्रीः
यद्वासयेदपि च दक्षिणवामकौ द्वौ ।
नो वा ततः किममरेशगुरोर्गुरुस्तु
प्रीतोऽस्त्वनेन पदपीठसमर्पितेन ॥
नावासयेत्ततः किमस्माकम् ॥

Colophon:

इति महामहोपाध्यायश्रीहरिदासभट्टाचार्यविरचिता कुसुमाञ्जलि-कारिकाव्याख्या समाप्ता ॥

R. No. **472.**

Paper. 16 × 2¼ inches. Foll. 24. Lines, 8 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

प्रश्नशास्त्रम्.

PRAŚNAŚĀSTRAM.

A treatise on predictions made from the nature of the reply which a person gives on being questioned on any matter.

Complete.

Beginning:

नमो गणेशाय ।

प्रसवपतनापचिन्ता । प्रसवे शीघ्रविनष्टचिन्ता । जातकर्मापचिन्ता ।

End:

सर्वेषां विवरणं निखिलमिहोक्तेन प्रकारेण प्रश्नकार्याणि विचारयेत् ॥

Colophon:

इति हरगौरीसंवादस्समाप्तः ॥

R. No. **473.**

Paper. 15½ × 4¼ inches. Foll. 58. Lines, 8 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिदीधितिप्रकाशिका—गादाधरी.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ: GĀDĀDHARĪ.

Same work as the one described under No. 4040 of the D.C.S. MSS., Vol. VIII.

Prāmāṇyavāda, incomplete.

R. No. **474.**

Paper. 15½ × 4¼ inches. Foll. 30. Lines, 8 in a page. Bengali. Good.

Purchased in 1911-12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : JĀGADĪŚĪ.

By Jagadīśabhaṭṭācārya.

A portion of the work described under No. 4086 of the D.C.S MSS., Vol. VIII.

Contains the first Vipratipatti of the Prāmāṇyavāda in the Pratyakṣakhaṇḍa.

R. No. **475.**

Paper. 13¼ × 3½ inches. Foll. 14. Lines, 8 in a page. Bengali. Good.

Purchased in 1911-12 from Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिव्याख्या— फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ : PHAKKIKĀ.

By Madhurānāthatarkavāgīśa.

Same work as the one described under No. 4019 of the D.C.S. MSS., Vol. VIII.

Contains the first Vipratipatti complete in Prāmāṇyavāda-rahasya.

R. No. **476.**

Paper. 12⅘ × 3⅘ inches. Foll. 19. Lines, 8 in a page. Bengali. Good.

Purchased in 1911-12 from Rāmacandrayyar of Manalur.

बौद्धाधिकारविवृतिः.

BAUDDHĀDHIKĀRAVIVṚTIḤ.

A commentary on the Ātmatattvavivēka of Raghunātha-śirōmaṇi: by Gadādharabhaṭṭācārya.

Incomplete.

Beginning :

श्रीकृष्णचरणद्वन्द्वमाराध्य श्रीगदाधरः ।
बौद्धाधिकारविवृतिं व्याकरोति शिरोमणेः ॥

आत्मतत्त्वविवेकग्रन्थारम्भसमये कृतश्या(स्या)चार्याणां परमेश्वरनमस्कारस्य ग्रन्थादौ स्वाम्यमित्यादिना.पद्येन तदुपनिबन्धनस्य च फलं दर्शयति--शिष्टेति । शिष्टाचारपरम्परा अभ्रान्तानां पूर्वपूर्वपण्डितानां प्रयोज्यप्रयोजकभावापन्नानां तादृशमङ्गलाचरणसमुदायः, तत्परिप्राप्ता तद्दर्शनानुमिताभिमतकर्मारम्भसमयकर्तव्यतया चिकीर्षितकर्मारम्भकालीनसफलकृतिविषयता यस्य तथाभूतमितिकर्तव्यताकमित्यन्तार्थः ।

End :

मानसज्ञाने प्रकारतया तज्ज्ञाने संसर्गतया तज्ज्ञानेऽपि बाधकाभावात् तथापि सा.

R. No. **477**.

Paper. 7⅞ × 6¼ inches. Foll. 116. Lines, 11 in a page. Dēvanāgarī. Good.

Purchased in 1911–12 from P. V. Trivikrama Rao of Egmore.

ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

Same work as the one described under No. 4810 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **478**.

Paper. 13½ × 5½ inches. Foll. 97. Lines, 12 in a page. Dēvanāgarī. Good.

Purchased in 1911-12 from P. V. Trivikrama Rao of Egmore.

भागवततात्पर्यनिर्णयः.

BHĀGAVATATĀTPARYANIRṆAYAḤ.

Foll. 1*a*—95*b*.

Same work as the one described under No. 4823 of the D.C.S. MSS., Vol. X.

Complete.

Foll. 96 and 97 are left blank.

R. No. **479.**

Paper. $8\frac{3}{4} \times 6\frac{5}{8}$ inches. Foll. 79. Lines, 21 in a page. Telugu. Good.

Purchased in 1911–12 from P. V. Trivikrama Rao of Egmore.

मध्वविजयः.

MADHVAVIJAYAḤ.

Foll. 1*a*—78*a*. Foll. 78*b* and 79 are left blank.

This work deals with the life of Madhvācārya or Ānandatīrtha, the founder of the dualistic school of Vēdānta. The author is Nārāyaṇapaṇḍitācārya, son of Trivikramapaṇḍita.

Complete in 16 Sargas.

The transcription of the manuscript is said to have been completed on Monday, the 10th of the bright fortnight in the month of Mārgaśīrṣa, in the year Akṣaya.

Beginning:

कान्ताय कल्याणगुणैकधाम्ने नवद्युनाथप्रतिमप्रभाय ।
नारायणायाखिलकारणाय श्रीप्राणनाथाय नमस्करोमि ॥
अनाकुलं गोकुलमुल्ललास यत्पालितं नित्यमनाविलात्मा ।
तस्मै नमो नीरदनीलभासे कृष्णाय कृष्णारमणप्रियाय ॥
अपि त्रिलोक्या बहिरुल्लसन्ती तमो हरन्ती मुहुरान्तरं च ।
दिश्याद्दृशं नो विशदां जयन्ती मध्वस्य कीर्तिर्दिननाथदीप्तिम् ॥
तमोनुदानन्दमवाप लोकस्तत्त्वप्रदीपाकृतिगोगणेन ।
यदास्यशीतांशुभुवा गुरूंस्तान् त्रिविक्रमार्यान् प्रणमामि वर्यान् ॥

* * * *

मुकुन्दभक्त्यै गुरुभक्तिजायै सतां प्रसत्त्यै च निरन्तरायै ।
गरीयसीं विश्वगुरोर्विशुद्धां वक्ष्यामि वायोरवतारलीलाम् ॥

* * * *

ये ये गुणा नाम जगत्प्रसिद्धा यं तेषु तेषु स्म निदर्शयन्ति ।
साक्षान्महाभागवतप्रबर्हं श्रीमन्तमेनं हनुमन्तमाहुः ॥

* * * *

तस्यैव वायोरवतारमेनं सन्तो द्वितीयं प्रवदन्ति भीमम् ।
स्पृष्टैव यं प्रीतिमतानिलेन नरेन्द्रकान्ता सुषुवेऽत्र कुन्ती ॥

End:

नमस्ते प्राणेश प्रणतविभवायावनिमगाः
नमः स्वामिन् रामप्रियतम हनूमन् गुरुगुण ।
नमस्तुभ्यं भीम प्रबलतम कृष्णेष्ट भगवन्
नमः श्रीमन् मध्व प्रदिश सुदृशं नो जय जय ॥
इति निगदितवन्तस्तत्र बृन्दारकेन्द्राः
गुरुविजयमहान्तो लालयन्तो महान्तः ।
ववृषुरखिलदृश्यं पुष्पवारं सुगन्धं
हरिदयितवरिष्ठे श्रीमदानन्दतीर्थे ॥

Colophon:

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डिताचार्यविरचिते श्रीमन्मध्वविजये महाकाव्ये आनन्दाङ्के षोडशः सर्गः ॥

R. No. **480**.

Paper. 17½ × 4 inches. Foll. 30. Lines, 8 in a page. Bengali. Good.

Purchased in 1911-12 from Rāmacandrayyar of Mīnalur.

रत्नकोशमतवादार्थः.

RATNAKŌŚAMATAVĀDĀRTHAḤ.

A discussion on the dobutful nature or otherwise of logical inferences.

Complete.

Beginning:

परोक्षज्ञानं निश्चयात्मकमेवेति सिद्धान्तः । रत्नकोशकारस्तु सत्प्रतिपक्षसंवलनदशायां संशयात्मिकामनुमितिमङ्गीकरोति । तत्र संशयत्वस्य लिङ्गपरामर्शादिजन्यतानवच्छेदकतया कथं तत्संशय उपपद्यत इति नाशङ्कनीयम् ।

End:

अपरकोट्यनुमितिसामग्र्यभावस्य (सामग्रीव्याप्तावनिवेशे उपदर्शितनानाविधगुरुतरशाब्दादिसामग्र्यभावस्यैव) निवेशयितुमुचितत्वादिति कथंचिदप्यनुमितेस्संशयत्वोपपत्तिरिति विस्तरेण ॥

Colophon:

इति रत्नकोशकृताकृत(नमत)विचारः संपूर्णः ॥

R. No. **481.**

Paper. $15\frac{1}{2} \times 4\frac{3}{8}$ inches. Foll. 25. Lines, 8 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

शक्तिवादः.

ŚAKTIVĀDAḤ.

Same work as the one described under No. 4?02 of the D.C.S. MSS., Vol. VIII.

Wants the first leaf and hence the beginning.

R. No. **482.**

Paper. $15\frac{7}{8} \times 3\frac{1}{4}$ inches. Foll. 30. Lines, 6 in a page. Bengali. Good.

Purchased in 1911–12 from Rāmacandrayyar of Manalur.

शब्दशक्तिप्रकाशिका.

ŚABDAŚAKTIPRAKĀŚIKĀ.

Same work as the one described under R. No. 410(*d*) *ante*.

Incomplete.

R. No. **483.**

Palm-leaf. 6 × 2 inches. Foll. 97. Lines, 9 in a page. Kanarese. Good.

Purchased in 1911-12 from G. Śrīnivāsa Rao of Mysore.

शिवानन्दलहरी—कर्णाटकटीकासहिता.

ŚIVĀNANDALAHARĪ WITH KANARESE COMMENTARY.

A hymn of one hundred stanzas in praise of Śiva. From the colophon given at the end of the work, it comes out that the author of the hymn is Śaṅkarācārya.

Complete.

Beginning:

कला(ला)भ्यां चूडालंकृतशशिकलाभ्यां निजतपः-
फलाभ्यां भक्तेषु प्रकटितफलाभ्यां भवतु मे ।
शिवाभ्यामस्तोकत्रिभुवनशिवाभ्यां हृदि पुन-
र्भवाभ्यामानन्दस्फुरदनुभवाभ्यां नतिरियम् ॥

* * * *

गलन्ती शम्भो त्वच्चरितसरितः किल्बिषरजो
दलन्ती धीकुल्यासरणिषु पतन्ती विजयताम् ।
दिशन्ती संसारभ्रमणपरितापोपशमनं
वसन्ती मच्चेतोहृदभुवि शिवानन्दलहरी ॥

End:

स्तोत्रेणालमहं प्रवच्मि न मृषा देवा विरिञ्चादयः
स्तुत्यानां गणनाप्रसङ्गसमये त्वामग्रगण्यं विदुः ।
माहात्म्याग्रविचारणे प्रकरणे धानातुषस्तोमव-
द्धूतास्त्वां विदुरुत्तमोत्तमफलं शंभो भवत्सेवकाः ॥

* * * *

Colophon:

श्रीशंकरभगवत्पादाचार्यविरचिताशिवानन्दलहरी संपूर्णा ॥

R. No. **484.**

Palm-leaf. 17¼ × 1¼ inches. Foll. 120. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1911–12 by T. N. Narasiṁhācāriyar of Triplicane.

अनर्घराघवव्याख्या.

ANARGHARĀGHAVAVYĀKHYĀ.

A commentary on the Anargharāghava of Murārikavi: by Harihara, son of Nṛsiṁhārya of Bhāradvājagōtra and a disciple of Bommakoṇḍa (Bommakaṇṭi ?) Appayācārya.

Almost complete.

Beginning:

अन्योन्यव्यस्तसामान्यसमावेशनिदर्शनम् ।
अव्याजभक्तिसुलभमव्यादिभमुखं महः ॥
ऐश्वर्यैहावशैर्नित्यं मनोवागादिभिः सुरैः ।
वन्दनीयां भजे वाणीं स्वाभीष्टफलसिद्धये ॥
बोम्मकोण्डप्पयाचार्यं वन्दे यस्य कृपावशात् ।
अपि बालाः प्रगल्भन्ते वैदुष्योत्कर्षशालिनः ॥
अस्ति शब्दे द्विमीमांस्यां प्रमाणे च कृतश्रमः ।
भारद्वाजो नृसिंहार्यसुतो हरिहराभिधः ॥
व्युत्पन्नशब्दः प्रथितो यत्र व्युत्पन्नतामगात् ।
सोऽयं हरिहरः प्राह टीकामानर्घराघवीम् ॥

इह खलु मुरारिर्नाम प्रसिद्धो महाकविः नाटकरूपप्रबन्धनिर्माणव्याजेन सकलपुरुषार्थसाधनं श्रीरामचन्द्रचिन्तनमभिसंधाय प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिमभिलषन् 'आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्' इत्यालंकारिकीं मुद्रामनुसरन् समुचितेष्टदेवतोपासनप्रतिपादनपरां नान्दीमभिनिबध्नाति—निष्प्रत्यूहमिति । विष्णुसंबन्धिन्याः गदायाः कौमोदकीति नाम प्रसिद्धम्, सैव लक्ष्म चिह्नं यस्य तस्य कौमोदकीलक्ष्मणः ।

End:

समुन्मीलदिति । सूक्तिमौक्तिकानां स्तबकेषु समूहेषु

* * * *

यशोरसायनमित्यनेन तस्य लोकोत्तरत्वं दर्शितम् । मधुस्यन्द इत्यनेन तस्य सहृदयानन्दजनकतया निर्दोषत्वं दर्शितम् । . . . . . तयोरेव कार्यत्वात् ॥

R. No. **485.**

Palm-leaf. 15 × 1¼ inches. Foll. 86. Lines, 6 in a page. Telugu. Good.

Presented in 1911–12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

(*a*) शमानम्—पददर्पणव्याख्यासहितम्.

ŚAMĀNAM WITH THE COMMENTARY, PADA-DARPAṆA.

Foll. 1*a*—19*b*.

Same work as the one described under No. 981 of the D.C.S MSS., Vol. II.

Complete.

(*b*) अनिङ्ग्यान्तम्—सव्याख्यानम्.

ANIṄGYĀNTAM WITH COMMENTARY.

Foll. 20*a*—32*a*.

Denotes the nature of the vowel-endings of such of the Vedic words of the Taittirīyasaṁhitā as are not divisible in Padapāṭha and as have their final vowels modified in Sandhi. The commentary is by Mallinātha.

Complete.

Beginning:

अथ यजुस्संहितायामकाराकारपूर्वस्वरपरो यकारो येषु पदेषु लुप्यते, तेष्वेकारैकारान्तानि पदानि प्रवक्ष्यन्ते । अत्रायमथशब्द आनन्तर्ये । आनन्तर्यं च लुप्तविसर्गपदलक्षणापेक्षया । अकाराकारपूर्वस्वरपरश्च यकारो यजुस्संहितायां येषु पदेषु लुप्यते, तेषु मध्ये एकारै-

कारान्तानि पदानि प्रवक्ष्यन्त इति योजना । पूर्वाध्याये शाखान्तरप्रसक्तिनिरासेऽपि लक्षणभेदेन शाखान्तरप्रसक्तिं निरस्यति—यजुस्संहितायामिति ।

End :

आहरामहा इति, उद्धारमुद्धरा इति, मुखतः परिहरन्त आश्विनाभ्रान् । हस्त आधाय सविता । अनिङ्ग्यान्तः सांनिध्याल्लब्धः । हस्त इत्येष शब्द अनिङ्ग्यान्तः सन् पदकाले एकारान्तो[न]भवति । उक्तमेवोदाहरणम् । अनिङ्ग्यान्त इति किम् ? विश्वतोहस्त उत विश्वतः । इङ्ग्यस्यान्त इङ्ग्यान्तः, इङ्ग्यान्तो न भवतीत्यनिङ्ग्यान्तः ॥

व्याख्यानं रचितं व्यक्तिवेटुकोलक्षणस्य च ।
बालानामपि बोधार्थं मल्लिनाथार्थयज्वना ॥

(*c*) नपरतपरम्—सव्याख्यानम्.

NAPARATAPARAM WITH COMMENTARY.

Foll. 32*b*—42*b*.

Similar to the work described under No. 918 of the D.C.S. MSS., Vol. II.

Complete.

(*d*) अवर्णि—सव्याख्यानम्.

AVARṆI WITH COMMENTARY.

Foll. 43*a*—51*b*.

Same work as the one described under No. 860 of the D.C.S MSS., Vol. II.

Complete.

(*e*) आवर्णि—सव्याख्यानम्.

ĀVARṆI WITH COMMENTARY.

Foll. 52*a*—57*b*.

Same work as the one described under No. 871 of the D.C.S. MSS., Vol. II.

Complete.

(*f*) अनिङ्ग्यम्—सव्याख्यानम्.

ANIṄGYAM WITH COMMENTARY.

Foll. 58*a*—59*a*. Fol. 59*b* is left blank.

Slightly different from the work described under No. 855 of the D.C.S. MSS., Vol. II.

Incomplete.

(*g*) अनिङ्ग्यान्तम्.

ANIṄGYĀNTAM.

Foll. 60*a*—63*a*.

Same text as the one described under sub-division (*b*) above.

Complete.

(*h*) नपरतपरम्.

NAPARATAPARAM.

Foll. 63*b*—64*b*.

Same work as the one described under No. 913 of the D.C.S MSS., Vol. II.

Complete.

(*i*) पूर्वोत्तरोभयदीर्घि.

PŪRVŌTTARŌBHAYADĪRGHI.

Foll. 65*a*—66*a*.

Same work as the one described under No. 926 of the D.C.S MSS., Vol. II.

Complete.

(*j*) उभयह्रस्वि.

UBHAYAHRASVI.

Fol. 66*a*.

Gives a list of such of the Vedic words of the Padapāṭha of the Taittirīyasaṁhitā as always begin or end in a short vowel

Complete.

Beginning and **End**:

उक्षान्नायोपावहरत्युपावस्यत्युपावयन्तिपरार्धाय ॥

Colophon:

इत्युभयह्रस्वि ॥

(*k*) रावणभेट्.

RĀVAṆABHĒṬ.

Fol. 66.

Same work as the one described under No. 951 of the D.C.S. MSS., Vol. II.

Complete.

(*l*) त्रिक्रमश्लोकाः.

TRIKRAMAŚLŌKĀḤ.

Fol. 66*b*.

These stanzas give a list of the places in the Taittirīyasaṁhitā where three words are repeated in the Kramapāṭha instead of two words as is usually done.

Complete.

Beginning:

आकारान्तमुदात्तान्तमाङ्परं यत्र दृश्यते ।
त्रिक्रमं तं विजानीयात् मोषूण ऊषुणस्तथा ॥

End:

कृत्वाहरति धत्ते च लभते त्रिक्रमाः स्मृताः ।
दध्नातनक्ति चोद्गातारोहतीति च विंशतिः ॥

(*m*) अर्धान्ताः.

ARDHĀNTĀḤ.

Foll. 66*b*—67*a*.

Indicates the beginnings of such of the Anuvākas in the Taittirīyasaṁhitā as consist of more than one sentence and therefore require pauses in the middle in reciting them.

Complete.

Beginning and **End** :

उभा वां होतर्दोषागन्मा सुवः संज्योतिषा सोमाय पितृमते सुवानः सोमो वर्धन्तु त्वा राजन् दिवोऽस्य जगतो रराणो वीहि[:] कव्यवाहन-पितॄन् कर्मण्यस्वधायै नमो मन्यासै शं प्रदेवं सन्ते वायुरग्नेयं यज्ञं क्षये पाथा ध्रुवक्षितिरपामतिं व्रतमेकास्य सुमतावग्निर्वृत्राणि चर्षणीनां य इमा वीरः शतमन्युपयसामहीनां सुहिरण्ये सुशिल्पे शुक्रास्ताः पुष्टं पशुमन्यते त्रिंशत् ॥

(*n*) ईकारान्ताः.

ĪKĀRĀNTĀḤ.

Fol. 67.

Gives a list of such of the Vedic words occurring in the Padapāṭha of the Taittirīyasaṁhitā as end in the long vowel ī.

Complete.

Beginning :

महिषी मघोनीन्द्रियावती गायती मानवी घृतपदी मैत्रावरुणी घृतवती यमित्री वक्ष्यन्त्यौदुम्बरी प्ररोहन्ती दशम्युभयतःशीर्ष्णी सोमक्रयणी इत्येतानि पदानि त्विकारपरईकारान्तानि ।

End :

सावित्री वैश्वदेवी पौष्णी सती पराच्ययस्मयी परोवरीयसी

* * * *

सहस्रतमी पयस्वती ॥

(*o*) कुम्भकर्णभेट्.

KUMBHAKARṆABHĒṬ.

Foll. 68*a*—69*b*.

This is a treatise on Vēdalakṣaṇa and gives the number of complete sentences contained in each of the Anuvākas of the Taittirīyasaṁhitā, the highest such number being 60.

Complete.

Beginning:

धृष्टिर्भुवनमस्यंशुना ते हविष्मतीराददे तं प्रत्नथाप्यायस्वेयुष्टे ये इन्द्रमिच्छत्रस्येन्द्रस्य ।

End:

त्वमग्ने रुद्रः पञ्चपञ्चाशत् । अग्निना रयिं सप्तपञ्चाशत् । अग्नि-र्मूर्धा(वैका)न्नषष्टिः ॥

(*p*) अवेष्टनसूत्रम्.

AVĒṢṬANASŪTRAM.

Fol. 70*a*.

Similar to the work described under No. 873 of the D.C.S. MSS., Vol. II.

Wants beginning and end.

(*q*) षड्विंशतिसूत्रम्.

ṢAḌVIṀŚATISŪTRAM.

Foll. 70*a*—77*a*.

Similar to the work described under No. 991 of the D.C.S. MSS., Vol. II.

Complete.

(*r*) त्रिक्रमश्लोकाः.

TRIKRAMAŚLŌKĀḤ.

Fol. 77.

Similar to the work described under the sub-division (*l*) above.

Complete.

(*s*) पदलक्षणम्.

PADALAKṢAṆAM.

Fol. 77*b*.

Gives the characteristics of the Padas occurring in the Taittiriyasaṁhitā of the Yajurvēda.

Complete.

Beginning:

एकोदात्तं पदं ज्ञेयमुदात्तं द्वितयं परम् ।
त्र्युदात्तं वा पदं विन्घा(द्या)न्नित्यस्वारमथापरम् ॥

End:

सुपूर्णा पुनरापत । ओष्ठमध्य इति किम्? अहुतमसि पुंसः पुत्रान् ॥

Colophon:

पदलक्षणं समाप्तम् ॥

(*t*) इङ्ग्यरत्नम्.

IṄGYARATNAM.

Foll. 78*a*—79*b*.

Similar to the work described under R. No. 95 (*d*) *ante*. By Sētu Bhairavāvadhānin.

Complete.

Beginning:

अथ यजुःसंहितायामिङ्ग्यपदान्यनुवाकमध्यावसानानि च विविच्य प्रत्यनुवाकमेकैकाक्षरं प्रतिप्रश्नमेकैकं वाक्यमिङ्ग्यरत्नं प्रवक्ष्यामः—अत्रे-

ङ्क्यप्रवर्तका वर्णा अकाराद्यौकारपर्यन्ता ऋकारल्कारप्लुतवर्जिता दश । ते व्यञ्जनोपरि स्थिता इङ्क्यानां यथाक्रममेकत्वद्वित्वादिसंख्याज्ञापनार्थाः ।

* * * *

अथावसानप्रवर्तकव्यञ्जनानि—कचटतपेति पञ्च समावसानज्ञापकानि।

End:

विसूङ्शूषौनूवै वेघूनि शाबुधाभूदिदैम्यूगूम्ये दीभोमौ हेमगुनुवासी-प्रुसौ वृकाघेनैमेघेमैचचेते भूधूमैदनाभैतोम ।

Colophon:

इति श्रीसेतूनिभैरवावधानिविरचितमिङ्क्यरत्नं समाप्तम् ॥

(u) अर्धान्तिकसंग्रहादि.

ARDHĀNTIKASAṄGRAHĀDI.

Foll. 80a—86a. Fol 86b is left blank.

Indicates the ends of the sentences in each Anuvāka, where a pause has to be made in repeating the Saṁhitā-text of the Taittirīyasaṁhitā.

Incomplete.

Beginning:

मर्त्येष्वासद्यूनन्यकेषां कासु चिद्वानुशाना प्रणीतौ यह्वीरविदाम देवान् मा गम्यात्तत्तदेषां गवीन्यौ ।

End:

पृथिव्याशा दिश आ पृण महि भ्राजन्त्यर्चयो विभावसो वाचं वदन्त्यपूतयाकरया नैति घोषश्चयु(इश्यु)त्तरे मन्थ्यग्रान् गृह्णीत सरस्वत्य-भिनोनेषि ।

R. No. **486**

Paper. 5⅞ × 3⅝ inches. Foll. 16. Lines, 7 in a page. Dēvanāgarī. Good.

Presented in 1911-12 by C. Viśvanātha Śāstri of Vizianagaram.

Fol. 1a is left blank.

वेदानुस्मृतिः.

VĒDĀNUSMṚTIḤ.

Foll. 1*b*—16*b*.

Deals with the Mantra addressed to Viṣṇu, the due repetition of which during the last moments of one's life is held to enable one to obtain salvation.

